# Shri Bala Shanti Stotram

# શ્રીબાલાશાન્તિસ્તોત્રમ્

## Document Information

Text title : Shri Bala Shanti Stotram

File name : bAlAshAntistotram.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH, chintAmaNitantre

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલાશાન્તિસ્તોત્રમ્

શ્રીભૈરવ ઉવાચ-

જય દેવિ જગદ્ધાત્રિ જય પાપૌઘહારિણિ ।
જય દુઃખપ્રશમનિ શાન્તિર્ભવ મમાર્ચને ॥ ૧॥

શ્રીબાલે પરમેશાનિ જય કલ્પાન્તકારિણિ ।
જય સર્વવિપત્તિઘ્ને શાન્તિર્ભવ મમાર્ચને ॥ ૨॥

જય બિન્દુનાદરૂપે જય કલ્યાણકારિણિ ।
જય ઘોરે ચ શત્રુઘ્ને શાન્તિર્ભવ મમાર્ચને ॥ ૩॥

મુણ્ડમાલે વિશાલાક્ષિ સ્વર્ણવર્ણે ચતુર્ભુજે ।
મહાપદ્મવનાન્તસ્થે શાન્તિર્ભવ મમાર્ચને ॥ ૪॥

જગદ્યોનિ મહાયોનિ નિર્ણયાતીતરૂપિણિ ।
પરાપ્રાસાદગૃહિણિ શાન્તિર્ભવ મમાર્ચને ॥ ૫॥

ઇન્દુચૂડયુતે ચાક્ષહસ્તે શ્રીપરમેશ્વરિ ।
રુદ્રસંસ્થે મહામાયે શાન્તિર્ભવ મમાર્ચને ॥ ૬॥

સૂક્ષ્મે સ્થૂલે વિશ્વરૂપે જય સઙ્કટતારિણિ ।
યજ્ઞરૂપે જાપ્યરૂપે શાન્તિર્ભવ મમાર્ચને ॥ ૭॥

દૂતીપ્રિયે દ્રવ્યપ્રિયે શિવે પઞ્ચાઙ્કુશપ્રિયે ।
ભક્તિભાવપ્રિયે ભદ્રે શાન્તિર્ભવ મમાર્ચને ॥ ૮॥

ભાવપ્રિયે લાસપ્રિયે કારણાનન્દવિગ્રહે ।
શ્મશાનસ્ય દેવમૂલે શાન્તિર્ભવ મમાર્ચને ॥ ૯॥

જ્ઞાનાજ્ઞાનાત્મિકે ચાદ્યે ભીતિનિર્મૂલનક્ષમે ।
વીરવન્દ્યે સિદ્ધિદાત્રિ શાન્તિર્ભવ મમાર્ચને ॥ ૧૦॥

સ્મરચન્દનસુપ્રીતે શોણિતાર્ણવસંસ્થિતે ।

સર્વસૌખ્યપ્રદે શુદ્ધે શાન્તિર્ભવ મમાર્ચને ॥ ૧૧॥

કાપાલિકિ કલાધારે કોમલાઙ્ગિઃ કુલેશ્વરિ ।
કુલમાર્ગરતે સિદ્ધે શાન્તિર્ભવ મમાર્ચને ॥ ૧૨॥

શાન્તિસ્તોત્રં સુખકરં બલ્યન્તે પઠતે શિવે ।
દેવ્યાઃ શાન્તિર્ભવેત્તસ્ય ન્યૂનાધિક્યાદિકર્મણિ ॥ ૧૩॥

મન્ત્રસિદ્ધિકામનયા દશાવૃત્ત્યા પઠેદ્યદિ ।
મન્ત્રસિદ્ધિર્ભવેત્તસ્ય નાત્ર કાર્યા વિચારણા ॥ ૧૪॥

ચન્દ્રસૂર્યોપરાગે ચ યઃ પઠેત્સ્તોત્રમુત્તમમ્ ।
બાલા સદ્મનિ સૌખ્યેન બહુકાલં વસેત્તતઃ ॥ ૧૫॥

સર્વભદ્રમવાપ્નોતિ સર્વત્ર વિજયી ભવેત્ ।
તીર્થકોટિગુણં ચૈવ દાનકોટિફલં તથા ।
લભતે નાત્ર સન્દેહઃ સત્યં સત્યં મયોદિતમ્ ॥ ૧૬॥

(ચિન્તામણિતન્ત્રે)

ઇતિ શ્રીબાલાશાન્તિસ્તોત્રં સમાપ્તમ્ ।

Proofread by PSA Easwaran

---

*Shri Bala Shanti Stotram*
pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*